तर्कसंग्रह

विद्वद्वर अन्नंभट्ट विरचित

मुरादाबाद निवासी सारस्वत
श्रीमन्नारायणशास्त्रि सूनु

वैजनाथशास्त्री

कृत भाषाटीका और सँस्कृत टिप्पणी से
विभूषित

पूर्वोक्त वैजनाथशास्त्री
तथा
रामकृष्ण कम्पनी द्वारा प्रकाशित।

"तन्त्रप्रभाकर प्रेस" मुरादाबाद में मुद्रित।
सन् १९०५

प्रति १०००   मूल्य ।)

Tantrap... abad

॥ श्रीगणेशायनमः ॥

भाषाटीकाटिप्पणीसहितः ॥

तर्कसंग्रहः

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानांसुखबोधाय क्रियते तर्कसंग्रहः ॥

जगन्नियन्ता श्री शंकर जी को हृदय में ध्यान कर तथा गुरुकी वन्दना कर बालकों के अनायास (सहज) से बोध होने के अर्थ यह तर्कसंग्रह नाम वाला ग्रन्थ (मुझ अन्नंभट्ट से) किया जाता है ॥

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः ॥ १ ॥

---

(१) अभिधेयत्वं ज्ञेयत्वं वा पदार्थसामान्यलक्षणम् ज्ञेयत्वंनाम ज्ञानविषयत्वम् ॥

द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय, और अभाव यह सात पदार्थ हैं ॥ १ ॥

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसिनवैव ॥ २ ॥

उन पदार्थों के मध्य में—पृथिवी, जल, तेज, वायु, आकाश, काल, दिशा, आत्मा, और मन यह नव द्रव्य होते हैं ॥ २ ॥

रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माऽधर्मसंस्काराश्चतुर्विंशतिगुणाः ॥ ३ ॥

रूप, रस, गन्ध, स्पर्श, संख्या, परिमाण, पृथकत्व, संयोग विभाग, परत्व, अपरत्व, गुरुत्व, द्रवत्व, स्नेह, शब्द, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म और संस्कार यह चौवीस गुण हैं ॥ ३ ॥

उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पञ्च कर्माणि ॥ ४ ॥

---

(२) गुणवत्वं द्रव्यसामान्यलक्षणम् कस्मिन्द्रव्येकियन्तोगुणाः सन्तितानाह ॥ श्लोकः—वायोर्नवैकादश तेजसो गुणाः । जलक्षितिप्राणभृतां चतुर्दश ॥ दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैवच ॥१॥ द्रव्यत्वजातिमत्वम्वा द्रव्यसमान्यलक्षगम् ॥

(३) द्रव्यकर्मभिन्नत्वेसति जातिमत्वं गुणत्वजातिमत्वम्वा गुणसामान्यलक्षणम् ॥

[४] संयोगाभिन्नत्वेसति संयोगासमवायिकारणत्वं कर्मत्वजातिमत्वश्चक्रात्मकम्वा, कर्मसामान्यलक्षणम् ॥

उत्क्षेपण, अपक्षेपण, आकुञ्चन, प्रसारण, और गमन यही पांच प्रकार के कर्म हैं ॥ ४ ॥

परमपरं चेति द्विविधं सामान्यम् ॥ ५ ॥

समान्य (जाति) यह दो प्रकारका है; पर, और अपर ॥ ५ ॥

नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव ॥ ६ ॥

विशेष यह नित्य द्रव्यों में रहतेहैं; और वोह अनन्तहैं ६ ॥

समवायस्त्वेक एव ॥ ७ ॥

समवाय यह एकही प्रकारका है ॥ ७ ॥

अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यंताभावोऽन्योन्याभावश्चेति ॥ ८ ॥

अभाव चार प्रकार का है, वह इस प्रकार यथा—प्रागभाव, प्रध्वन्साभाव, अत्यन्ताभाव, और अन्योन्याभाव ॥ ८ ॥

अथ द्रव्यविशेषलक्षणान्युच्यन्ते ॥

तत्र गंधवती पृथिवी । सा द्विविधा नित्याऽनित्या चेति । नित्या परमाणुरूपा । अनित्या

---

[५] नित्यत्वे सत्यनेंकसमवेतत्वं सामान्यलक्षणम् ॥

[६] निःसामान्यत्वे सति सामान्यभिन्नत्वे सति समवेतत्वंविशेषलक्षणम् अयमस्माद्व्यावृत्त इति व्यावृत्तिबुद्धिमात्रहेतुर्विशेषः ॥

[७] नित्यसम्बन्धत्वं समवायलक्षणम् समवायसिद्धिश्चानेन प्रमाणेन–यथा–गुणक्रियादिविशिष्टबुद्धिर्विशेष्यविशेषणसम्बन्धविषया विशिष्टबुद्धित्वाद्दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानम् ॥

[८] भावभिन्नत्वमभावसामान्यलक्षणम् । इहकपालेघटो भविष्यतीत्युदाहरणं प्रागभावस्य, इहकपालेघटो ध्वस्त इतिप्रतीतिःप्रध्वन्साभावस्य, इहभूतलेघटो नास्तीत्याकारोऽत्यन्ताभावस्य,घटोनपटः इति स्वरूपमन्योन्याभावस्येति ज्ञेयम् ।

कार्यरूपा। सा पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् शरीर(क)मस्मदादीनाम्। इन्द्रियं गंधग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादिः ॥६॥

(इस के उपरान्त नव द्रव्यों का वर्णन करते हैं) उन में जो गन्धवती है वह पृथिवी है। वोह नित्य और अनित्य भेद द्वारा दो प्रकार की है। परमाणु रूप पृथिवी नित्य है। और कार्य रूप अनित्य है। पृथिवी के और भी तीन विभाग हैं जैसे शरीर, इन्द्रिय, और विषय। शरीर—हमारे सदृश मनुष्य आदि में, प्रसिद्ध है। जो गन्धग्राहक है, और हमको जिस से गन्ध का ज्ञान होता है वोह इन्द्रिय है, उसको घ्राण ऐसा कहते हैं, और वोह नासिका के अग्रभाग में रहता है। मृत्तिका पाषाण वृक्षलता इत्यादि वस्तु यह विषय कहाते हैं ॥९॥

शीतस्पर्शवत्य आपः। ताश्च द्विविधा नित्या अनित्याश्चेति। नित्याः परमाणुरूपाः।

---

[९] समवायेन गन्धवत्वं पृथिव्या लक्षणम्, ध्वन्साप्रतियोगित्वे सति प्रागभावायोगित्वे सति गन्धवत्वं नित्यपृथिव्यालक्षणम्, ध्वंसप्रागभावान्यतरप्रतियोगित्वे सति गन्धवत्वं अनित्यपृथिव्यालक्षणम्, चेष्टावदन्त्यावयावित्वे सति गन्धवत्वं पार्थिवदेहस्य लक्षणम्, प्रत्यक्षकरणत्वे सति गन्धवत्वं पार्थिवेन्द्रियस्य लक्षणम्, उपभोगसाधनत्वे सति गन्धवत्वं पार्थिवविषयस्य लक्षणम् (क] पार्थिवशरीरं द्विविधं योनिजमयोनिजञ्च। तत्र शुक्रशोणितसंनिपातजं योनिजमस्मदादीनां प्रत्यक्षासिद्धम्। शुक्रशोणितसंनिपातं विना धर्मविशेषसहकृतपरमाणुप्रभवमयोनिजं देवर्षिनारदादीनाम् ॥
इन्द्रियसामान्यलक्षणन्त्विदं यथा शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसयोगाश्रयत्वमिन्द्रियत्वं बोध्यम् ॥

अनित्याः कार्यरूपाः।ताः पुनस्त्रिविधाः शरीरेंद्रिय विषयभेदात् । शरीरं (अयोनिजं) वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ॥ १० ॥

जिनका शीत (ठंडा) स्पर्श होता है वोह जल कहाते हैं । नित्य और अनित्य भेद से जल दो प्रकार के हैं । जो परमाणु रूपहैं वोह नित्य हैं । और कार्य रूपहैं वोह अनित्यहैं । फिरभी वोह जल तीन प्रकार के हैं, वोह तीन प्रकार यथा- शरीर, इन्द्रिय, और विषय । जलात्मक शरीर वरुणलोक में प्रसिद्ध है, रसका ज्ञान जिस से होताहै वही जलात्मक इन्द्रिय है, उसकी रसन यह संज्ञा है, और वह जिह्वा के अग्रभाग में रहता है । जलात्मक विषय—नदी समुद्र आदि जानना (परन्तु जलात्मक शरीर अयोनिजहै) ॥ १० ॥

उष्णस्पर्शवत्तेजः । तद्द्विविधं नित्यमनित्यं च । नित्यं परमाणुरूपम् । अनित्यंकार्यरूपम् । पुनस्त्रिविधं शरीरेंद्रियविषयभेदात् । शरीर(अयोनिजं) मादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधः । भौमदिव्यौ दर्याकरजभेदात् । भौमंवह्न्यादिकम् अविंधनं-

---

[१०] समवायेन स्नेहवत्वं जलस्यलक्षणम् । नित्यानित्यशरीरेन्द्रियविषयाणां लक्षणानि गन्धवत्वस्थाने स्नेहवत्वं दत्वा पूर्वोक्तान्येव ज्ञेयानि ।

[११] समवायेनोष्णस्पर्शवत्वं तेजसोलक्षणम् । शेषं पृथिवीवदुष्णस्पर्शवत्वं दत्वा बोध्यम् ॥

दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरौदर्यम् आकरजं सुवर्णादि ॥ ११ ॥

जिसका उष्ण (गर्म) स्पर्श होता है वोह तेज कहाता है, वोह नित्य अनित्य ऐसा दो प्रकार वाला है। परमाणु रूप नित्य होता है और कार्य रूपसे अनित्य होता है। फिर वहतेज तीनप्रकारका है, वोह तीनप्रकार—शरीर, इन्द्रिय, और विषय यही हैं। तैजस शरीर (अयोनिज) सूर्य लोकमें प्रसिद्ध हैं। जो रूपको ग्रहण करता है वोह तैजस इन्द्रिय है। उसकी चक्षु यह संज्ञा है। और जो चक्षु में चलायमान काली पुतली है उसके अग्रभाग में सूक्ष्मरूप से रहता है उसही से हमलोग देखते हैं। तैजस विषय चार प्रकार का है, वोह चार प्रकार यथा—भौम, दिव्य, औदर्य, और आकरज यह हैं। भौम अर्थात् भूमि में होने वाला अग्नि आदि तेज। दिव्य अर्थात् जल के योग से जिसका पोषण होता है वोह आकाश में रहने वाला विजली सूर्य वडवानल आदिहै। भोजनकरनेके उपरान्त जिस के योग से अन्न पकताहै वोह उदरके भीतर रहनेवाला तेज (जठरानल) औदर्य कहाता है। और जो सुवर्ण चांदी आदि खानमें उत्पन्न होते हैं उनको आकरज नामक कहतेहैं ॥ ११ ॥

(5) वायु

रूपरहितस्पर्शवान्वायुः। स द्विविधो नित्योऽनित्यश्च। नित्यः परमाणु(क) रूपः। अनित्यः कार्यरूपः। पुनस्त्रिविधः शरीरेंद्रियविषयभेदात्।

---

१२ समवायेन रूपवदवृत्तिस्पर्शवत्वं वायोर्लक्षणम् शेषं पूर्ववत् रूपवदवृत्ति स्पर्शवत्वं दत्वा बोध्यम् ॥ [क] मूर्तत्वेसति निरवयवः परमाणुः सचातीन्द्रियएव। तदुक्तम्—जालान्तरस्थसूर्यांशौ यत्सूक्ष्मंदृश्यतेरजः। भागस्तस्यच षष्ठोयः परमाणुः स उच्यते ॥

शरीरं(अयोनिजं)वायुलोके । इंद्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति।विषयो वृक्षादिकंपनहेतुः १२॥

जो रूप रहित होकर स्पर्श वाला होता है वोह वायु है वोह नित्य और अनित्य ऐसा दो प्रकार का है। परमाणु रूप से नित्य होता है और कार्य रूपसे अनित्य होता है । वायु के और भी तीन भेद हैं यथा-शरीर इन्द्रिय और विषय। वाय्वात्मक (अयोनिज) शरीर वायु लोकमेंहै । जिस के योगसे स्पर्शकाज्ञानहोताहै वोह इंद्रियहै। उसको त्वचा (खाल) ऐसी संज्ञा है । त्वगिन्द्रिय सम्पूर्ण शरीर में व्याप्त होकर रहता है। वृक्ष आदि के हिलाने चलाने में जो वायु कारणी भूत है वोह विषय कहाता है (वोह महावायु आदि जानना) ॥ १२॥

शरीरांतःसंचारी वायुः प्राणः । स चैकोऽप्युपाधिभेदात्प्राणापानादिसंज्ञांलभते ॥ १३ ॥

शरीर के भीतर संचार (चलने फिरनेवाला जो वायु है उसको प्राणकहतेहैं। वोह वायु एक होनेपर भिन्न २ उपाधियों से प्राण अपान इत्यादि संज्ञा को प्राप्त होता है ॥ १३ ॥

शब्दगुणमाकाशम् । तच्चैकं विभु नित्यं च १४।

शब्द यह जिसका गुण है वोह आकाश है, वोह एक, विभु, और नित्य है ॥ १४ ॥

---

[१३] हृदिप्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कंठदेशस्थो व्यानः सर्वशरीरगः । अत्रतुक्रियाभेदात्प्राण एव पञ्चसंज्ञांलभते नतु शरीरे पञ्चान्यथा मूर्तानां समानदेशतास्यादितिवोध्यम् ॥

[१४] समवायेन शब्दवत्वमाकाशस्य लक्षणम् सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम् । मूर्तत्वं परिच्छिन्नपरिमाणवत्वं क्रियावत्त्वम्वा ॥

अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च ॥ १५ ॥

अतीत आदि (भूत भविष्यत् वर्तमान) व्यवहार का हेतु भूत जो होताहै वह काल है। वोह एक, विभु, औरनित्यहै १५

प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च ॥ १६ ॥

प्राच्यादिक (पूर्व, पश्चिम दक्षिण उत्तर आदि) व्यवहार का हेतु भूत जो है वह दिशा है। वह दिशा एक, विभु, और नित्य है ॥ १६ ॥

ज्ञानाधिकरणमात्मा। स द्विविधो जीवात्मा परमात्मा च। तत्रेश्वरः सर्वज्ञः परमात्मैक एवसुखदुःखादिरहितः। जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च ॥ १७ ॥

जो ज्ञानोंका अधिकरण होताहै वह आत्माहै। वह जीवात्मा और परमात्मा इनभेदों से दोप्रकारकाहै। इनमें जो परमात्मा है वही ईश्वरहै, सर्वज्ञहै, और एकहै। जीवात्मातौ प्रत्येक शरीरोंमें भिन्नभिन्नहै और वह विभु तथा नित्य है ॥ १७ ॥

---

[१५] पदार्थमात्राधारत्वं सर्वकार्यनिमित्तकारणत्वञ्चकालस्य लक्षणम्।
[१६] दूरत्वसमीपत्वबुद्धिनियामकत्वं सर्वकार्यनिमित्तकारणञ्च दिशोलक्षणम्
[१७] ज्ञानवत्वमात्मनः सामान्यलक्षणम् समवायेन नित्यज्ञानवत्वं परमात्मनोलक्षणम्, समवायेन सुखादिमत्व जीवात्मनोलक्षणम्,

सुखदुःखाद्युपलब्धिसाधनमिंद्रियं मनः । तच्चप्रत्यात्मनियतत्वादनंतं परमाणुरूपं नित्यं च ॥ १८॥

सुख दुःखादिकी उपलब्धि (साक्षात्कार अर्थात् प्रत्यक्ष होना) का साधनीभूत जो इन्द्रिय है वह मन है । वह प्रत्येक आत्मा में एकएक होकर संबद्ध है इसकारण वह अनन्त है । तथा परमाणुरूप और नित्य है ॥ १८ ॥

इति द्रव्यविशेषलक्षणानि ॥

चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं । पृथिवीजलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधं । अभास्वरं शुक्लं जले । भास्वरं शुक्लं तेजसि ॥ १९ ॥

चक्षुर्मात्रग्राह्य जो गुण होता है वही रूप है । वहरूप—शुक्ल (सफेद) नील (नीला) पीत (पीला) रक्त (लाल) हरित (हरा) कापिस (कपासी)और चित्र (चितकबरा) इनभेदों से सात प्रकारकाहै । यहरूप—पृथिवी, जल, और तेजमें रहताहै । इन में से—पृथिवीमें तो सातही प्रकारका रहताहै जलमें रूप अभास्वर (नहीं चमकनेवाला) शुक्ल है, और तेजमें रूपभास्वर (चमकीला) शुक्लहै ॥ १९ ॥

रसनग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः पृथिवीजलवृत्तिः । पृथिव्यां षड्विधः । जले मधुर एव ॥ २० ॥

[१८] स्पर्शरहितत्वे सति क्रियावत्वं सुखादिप्रत्यक्षकरणत्वंम्वा मनसोलक्षणम् ॥

[१९] चक्षुर्मात्रग्राह्यजातिमद्गुणत्वम् रूपस्यलक्षणम् ॥

[२०] रसनेन्द्रियग्राह्यजातिमत्वं रसाणां लक्षणम् ॥

रसनेन्द्रिय से जिसका ग्रहण करा जाता है ऐसा जो गुण वोह रस होता है। उसके—मधुर, अम्ल, लवण, कटु, कषाय, और तिक्त यह छः भेद हैं। वोह पृथिवी और जल इनमें रहता है। पृथ्वी में रहने वाला रस तौ छः ही प्रकार का है। परन्तु जल में रहने वाला रस केवल मधुरही होता है॥ २०॥

घ्राणग्राह्यो गुणो गंधः। स च द्विविधः सुरभिरसुरभिश्च पृथ्वीमात्रवृत्तिः ॥२१॥

घ्राणेन्द्रिय से जिसका ग्रहण होता है ऐसा जो गुण है वोह गन्ध है। वोह सुरभि, और असुरभि ऐसा दो प्रकार का है। और वह पृथिवी मात्र में ही रहता है॥ २१॥

त्वगिंद्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः शीतोष्णानुष्णाशीतभेदात् पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः॥ २२॥

त्वागिन्द्रिय मात्र से ग्राह्य जो गुणहै वोह स्पर्श है। वोह—शीत, उष्ण, और अनुष्णाशीत, ऐसा तीन प्रकार का है। वोह—पृथिवी, जल, तेज, और वायु इन में रहता है। इनमें से—शीतस्पर्श, तौ जल में रहता है। उष्णस्पर्श, तेज में रहता है। और जो उष्ण भी नहीं और शीत भी नहीं अर्थात् सुहाता २ स्पर्श हो वह पृथिवी और वायु इन दोनों मेंही रहता है॥ २२॥

[२१] घ्राणग्राह्यजातिमत्वं गन्धस्यलक्षणम्॥
[२२] त्वागिन्द्रियमात्रग्राह्यजातिमद्गुणत्वं स्पर्शस्यलक्षणम्॥

रूपादिचतुष्टयं पृथिव्यां पाकजमानित्यं च। अन्यत्रापाकजं नित्यमनित्यं च नित्यगतं नित्यं अनित्यगतमनित्यम्॥ २३॥

रूप, रस, गन्ध, और स्पर्श, यह चार गुण पृथिवी में पाकज अर्थात् उष्ण के सम्पर्क से उत्पन्न होने वाले और अनित्य हैं। परन्तु इतर अर्थात् पृथिवी से भिन्न द्रव्यों के मध्य में वोह रसादि चतुष्टय अपाकज होते हैं अर्थात् उष्ण के सम्पर्क से उत्पन्न नहीं होते हैं। उन में भी वोह नित्य और अनित्य ही होते हैं। वोह नित्यों में नित्य और अनित्यों में अनित्य होते हैं॥ २३॥

एकत्वादिव्यवहारासाधारणहेतुः संख्या। सा नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च नित्यगतंनित्यं। अनित्य गतमनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव २४॥

---

[२३] द्विविधायामपि पृथिव्यां रूपादयश्चत्वारोऽप्यनित्याः पाकजाश्च। तत्र हि तेजःसंयोगात्पूर्वश्यामादिनिवृत्तौ रक्ताद्युत्पाददर्शनात्। तत्रापि पूर्वरूपादिनाशकरूपाद्यन्तरोत्पादकः पाकः परमाणुष्वेवेति वैशेषिकमतम्। द्व्यणुकाद्यवयविन्यपीति नैयायिकाः। जलतेजोवायुषु च नित्यगता रूपादयो नित्याः, अनित्यगताश्चानित्याः। उद्भूतानुद्भूतभेदेनापि रूपादयश्चत्वारो द्विविधाः। घ्राणरसनचक्षुस्त्वगादावनुद्भूताः। उद्भूतास्तु योग्यपृथिव्याद्यारम्भकपरमाणुकत्र्यणुकादौ। चित्राचित्रभेदेनापि ते द्विविधा इत्यपि केचित्। नीलपीतादिमधुरतिक्तादिसुरभ्यसुरभ्यादिसुकुमारकाठिनाद्यवयवारब्धपटादिषु चित्राः। अन्यत्राचित्राः॥

[२४] गणनव्यवहारासाधारणकारणत्वं संख्याया लक्षणम्॥

प्रत्यक्षखण्डम् ।

एकत्व आदि व्यवहार का जो हेतु है उसको संख्या कहते हैं। संख्या यह गुण सम्पूर्ण नव द्रव्यों में रहने वाला है। एकत्व को आदि लेकर परार्ध पर्यन्त वोह संख्या होती है। उनमें एकत्व—यह नित्य, और अनित्य ऐसा दोही प्रकार का है। नित्य द्रव्यों में एकत्व नित्य है और अनित्य द्रव्यों में एकत्व अनित्य है। परन्तु द्वित्वादिक सम्पूर्ण संख्या सर्वत्र स्थल में अनित्यही होती है ॥ २४ ॥

(७) परिमाण

मानव्यवहारासाधारणं कारणं परिमाणं नवद्रव्यवृत्ति। तच्चतुर्विधम् । अणु महद्दीर्घं ह्रस्वं चेति ॥ २५ ॥

मानव्यवहार का जो असाधारण कारणहै वोह परिमाणहै। वोह नव द्रव्योंमें रहताहै वोह अणु—महत-दीर्घ-और ह्रस्व-ऐसे चार प्रकार का है ॥ २६ ॥

(८) पृथक्त्व

पृथग्व्यवहारासाधारणं कारणं पृथक्त्वं सर्वद्रव्यवृत्ति ॥ २६ ॥

पृथक् व्यवहार का जो असाधारण कारणहै वोह पृथक्त्व है। यह गुण सर्व द्रव्यों में रहता है ॥ २६ ॥

(९) संयोग

संयुक्तव्यवहारासाधारणो हेतुः संयोगः सर्वद्रव्यवृत्तिः ॥ २७ ॥

---

[२५] अणु ह्रस्वपरिमाणे परमाणुद्व्यणुकयोः । महद्दीर्घपरिमाणे त्र्यणुक चतुरणुकादौ ॥

[२६] पृथक्व्यवहारासाधारणकारणत्वं पृथक्त्वस्यलक्षण ॥

[२७] विभागजनककर्मजगुणवृत्तिगुणत्वव्याप्यजातिम संयोगस्य लक्षणम् ॥

सयुक्त व्यवहारका जोअसाधारण कारणहै वह संयोगहै। यह गुण सर्व द्रव्यों में रहता है ॥ २७ ॥

संयोगनाशको गुणो विभागः। सर्वद्रव्य वृत्तिः ॥२८॥

संयोग का नाश जिसके योगसे होता है ऐसा जो गुण वोह विभाग है। यह गुण सर्व द्रव्यों में रहता है ॥ २८ ॥

परापरव्यवहारासाधारणकारणे परत्वापरत्वे पृथिव्यादिचतुष्टयमनोवृत्तिनी ते द्विविधे। दिक्कृतेकालकृतेच। दूरस्थे दिक्कृतं परत्वं समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम् कनिष्ठे कालकृतमपरत्वम् ॥ २९ ॥

पर और अपर इसप्रकारके व्यवहारों का जो असाधारण कारण है वोह परत्व और अपरत्व कहाता है। यह दोनों गुण पृथिवी, जल, तेज, वायु और मन, इन द्रव्यो में रहते हैं। परत्व और अपरत्व यह दोनोंही दिक्कृत और कालकृत होते

संयोगनाशकगुणत्वं विभागस्यलक्षणम् ॥ २८ ॥

परव्यवहारासाधारणं कारणं परस्यलक्षणम् । अपरव्यवहारासाधारण कारणमपरस्य लक्षणम् । योयदपेक्षया ज्येष्ठस्तत्र तदवधिकं परत्व कालकृतम्। यो यदपेक्षया कनिष्ठस्तत्र तदवधिकमपरत्वं कालकृतम् । अत्र कालपिण्डसंयोगोऽसमवायी । ज्येष्ठकनिष्ठत्वज्ञानं निमित्तम् । तन्न शश्च तन्नाशानिमित्तम् । एतेऽनित्यद्रव्यएव । यो यदपेक्षया दूरस्थस्तत्र तदवधिकं परत्वं दिक्कृतम् । यो यदपेक्षया संनिहितस्तत्रतदवधिकमपरत्वं दिक्कृतम् । अत्रादिक्पिण्डसंयोगोऽसमवायी । दूरत्वसंनिहितत्वज्ञानं निमित्तम्। तन्नाशश्च तन्नाशानिमित्तम्। एतेमूर्तद्रव्यएव ॥ २९ ॥

है। जो पदार्थ अपने पाससे दूरहै उसमें दिक्कृत परत्व रहताहै और जो अपने पासहीहै उसमें दिक्कृत अपरत्व रहता है जोपुरुष अपनेसे बड़ा है उसमें कालकृत परत्व रहताहै। और जो अपने से छोटा है उस पुरुष में कालकृत अपरत्व रहता है ॥ २९ ॥

आद्यपतनासमवायिकारणं गुरुत्वं पृथिवी जलवृत्ति ॥ ३० ॥

आद्यपतनका जो असमवायि कारण है वोह गुरुत्वहै। यह गुण पृथिवी और जलमें रहता है ॥ ३० ॥

आद्यस्यंदनासमवायिकारणं द्रवत्वं पृथिव्यप्तेजोवृत्ति। तद्द्विविधं सांसिद्धिकं नैमित्तिकं च सांसिद्धिकं जले नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजन्यं द्रवत्वम्। तेजसि सुवर्णादौ ॥ ३१ ॥

आद्यस्पन्दनका जो असमवायि कारणहै वोह द्रवत्वहै। यह गुण—पृथिवी, जल, और तेज इनमें रहता है। सांसिद्धिक और नैमित्तिक इनदो भेदों से द्रवत्व दोप्रकार है। सांसिद्धिक द्रवत्व जलमें रहताहै। और नैमित्तिक द्रवत्व पृथिवी और तेजमें रहताहै। अग्नि संयोग के निमित्तसे घृतादिक पदार्थ पिघलकर पतलाहोताहै यही पृथिवी में नैमित्तिक द्रवत्व का उदाहरणहै। और अग्नि संयोगसे सुवर्णादिक द्रवक (पिघल) ता है यह तेजमें नैमित्तिक द्रवत्वका उदाहरण है ॥ ३१ ॥

आद्यपतनासमवायिकारणत्वं गुरुत्वस्य लक्षणम्। ३० ॥

आद्यस्यन्दनासमवायिकारणत्वं द्रवत्वस्य लक्षणम्। अग्निसंयोगानपेक्षं द्रवत्वंसांसिद्धिकम्। अग्निसंयोगापेक्ष्यंद्रवत्वं नैमित्तिकम् ॥ ३१ ॥

चूर्णादिपिंडीभावहेतुर्गुणः स्नेहो जलमात्रवृत्तिः ॥३२॥

चूर्णादिकका पिंड अर्थात् एक गोलासा जिसके योगसे सिमट कर बंधजाता है ऐसा जो गुणहै वही स्नेह है। यह गुण केवल जलके मध्य में ही रहता है ॥ ३२ ॥

श्रोत्रग्राह्यो गुणः शब्दःआकाशमात्रवृत्तिः सद्विविधो ध्वन्यात्मको वर्णात्मकश्चेति।ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः३३॥

श्रोत्रसे जिसका ग्रहण करा जाता है ऐसा जो गुण है वोह शब्द है। यह गुण आकाश मात्रमें ही रहता है। वोह ध्वन्यात्मक और वर्णात्मक ऐसा दोप्रकारका है। ध्वन्यात्मक शब्द वह है जो भेरी मृदंग आदि से उत्पन्न होता है और वर्णात्मक शब्द वह है जो सँस्कृत भाषा आदि में उच्चारण किया जाता है ॥ ३३ ॥

सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः। सा द्विविधा स्मृतिरनुभवश्च संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। सद्विविधो यथार्थोऽयथार्थश्च। तद्वतितत्प्रकारकोऽनुभवो यथार्थः। यथा रजत इदं

चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम्। पिण्डीभावोनाम चूर्णादिधारणकर्षणहेतुभूतो विलक्षणसंयोगः। चणकचूर्णादिष्वयंगः। घृततैलादौस्नेहोपलम्भस्तु जलोपाधिकः ॥ ३२ ॥

श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं शब्दस्य लक्षणम् ॥ ३३ ॥

रजतमिति ज्ञानं । सैव प्रमेत्युच्यते । तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः । यथा शुक्ताविदं र-जतमिति ज्ञानम् । सैवाप्रमेत्युच्यते ॥ ३४ ॥

सर्व व्यवहारकी हेतु भूत ऐसी जो है वोह बुद्धि है । और उसीको ज्ञान ऐसा कहते हैं । बुद्धि के दो भेद हैं; एक स्मृति, और दूसरा अनुभव । सँस्कार मात्र जन्य जो ज्ञान है वोह स्मृति है और उससे भिन्न जो ज्ञान है वह अनुभव है । वोह अनुभव—यथार्थ, और अयथार्थ ऐसे दो प्रकारका है । जो पदार्थ जैसाहो उसी प्रकारका उसका जो ज्ञान होता है वोह यथार्थ अनुभव होता है । उदाहरण यथा-रजत (चांदी) का " यह चांदी है " इसप्रकार का जो ज्ञान होता है वह यथार्थ अनुभव है । और इसीको " प्रमा " ऐसा कहते हैं । जो यथार्थ जिसप्रकारका नहीं है तिस प्रकारका वोह है ऐसा जिस पदार्थ विषयक ज्ञानहोताहै वही अयथार्थ अनुभव है । उदा-हरण—यथा-यथार्थ (असल) में है तो मोतीकी सीप और उसमें अपने आपको " यह चांदीहै " इसप्रकारका जो ज्ञान होताहै वोह अयथार्थ अनुभव है । और इसी को " अप्रमा " ऐसा कहते हैं ॥ ३४ ॥

सम्बन्धावच्छिन्नप्रकारतानिरूपितप्रकारतासमानाधिकरणगुणत्व व्याप्यजातिमत्वं बुद्धिसामान्यलक्षणम्।संस्कारमात्रजन्यज्ञानत्वं स्मृतेर्लक्षणम् । यथा-सामाणिकर्णिका । सविश्वेश्वर इत्यादि। अत्रपूर्वानुभवः कारणं सँस्कारोव्यापारः । स्मृतिभिन्नसप्रकारकज्ञानत्वमनुभवस्य लक्षणम्।तद्वन्निष्ठविशेष्यतानिरूपिततत्प्रकारताशालिज्ञानत्वं प्रमायालक्षणम् उदाहरणम्—" इदंरजतम् " इति ज्ञानंरज-तत्ववद्विशेष्यतानिरूपितरजतत्वप्रकारकमस्त्येव ॥ तदभाववन्निष्ठविशेष्यतानिरूपिततत्प्रकारताशालिज्ञानत्वमप्रमायालक्षणम् । उदाहरणम्—शुक्तौ " इंदरजतम्—इत्यत्र शुक्तिविशेष्यकं रजतत्वप्रकारं ज्ञानमस्त्येव ॥ ३४ ॥

यथार्थानुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात् तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् ॥ ३५ ॥

यथार्थानुभवके चार भेद हैं । वह इसप्रकार यथा-प्रत्यक्ष, अनुमिति, उपमिति, और शाब्द । इस चारप्रकारकी प्रमाकाकरण भी चार प्रकारकाहै । वह चार प्रकार यह हैं यथा-प्रत्यक्ष, अनुमान, उपमान, और शब्द ॥ ३५ ॥

व्यापारवदसाधारणं कारणं करणम्। अनन्यथासिद्धकार्यनियतपूर्ववृत्ति कारणम् । कार्यं प्रागभावप्रतियोगि ॥ ३६ ॥

यथार्थानुभवः प्रत्यक्षमेव—इतिचार्वाकाः । अनुमितिरपि—इतिकाणादबौद्धाः । उपमितिरपि-इति नैयायिकैकदेशिनः । शाब्दमपि—इति नैयायिकाः । अर्थापत्तिरपि इति प्राभाकराः । अनुपलब्धिरपि-इति भाट्टवेदान्तिनौ सांभवैतिह्यकावपि-इति पौराणिकाः । चेष्टापि-इतितान्त्रिकाः । एतेषांमतेऽस्वरसंविचार्य नैयायिकरीत्या चातुर्विध्यं दर्शितम्—तदुक्तं सूत्रकृतायथा—"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति ॥ ३५ ॥

द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारस्यलक्षणम् । तज्जन्यत्वेसति दण्डजन्यत्वे सति तज्जन्यजनकत्वं दण्डजन्यघटजनकत्वंदण्डादौ चक्रभ्रमणंव्यापारः एव कपालसंयोगतन्तुसंयोगादेरपि कपालतन्तुव्यापारत्वं कपालेतन्तुसंयोगयोः कपालजन्यत्वे तन्तुजन्यत्वे सति तज्जन्यघटपटजनकत्वात् अन्यथासिद्धशून्यकार्यनियतपूर्ववृत्तित्वं कारणत्वम् । कार्यान्नियताऽवश्यंभाविनी पूर्ववृत्तिः पूर्वक्षणवृत्तिर्यस्यतत्तथेत्यर्थः । अव्यवहितपूर्वकालावच्छेदेन कार्यदेशसत्वमितिभावः उदाहरणम्—पटस्य-तन्त्वादिकम् । घटस्य कपालादिकम् । प्रागभावप्रतियोगित्वं कार्यस्यलक्षणम् । कार्योपत्तेः पूर्वं "इह घटो भविष्यति" इतिप्रतीतिर्जायते इतिप्रतीतिविषयोऽभावः प्रागभावः तत्प्रतियोगि घटादिरूपं कार्यम् ॥ ३६ ॥

जो असाधारण कारण है वही करण कहाता है। जो कार्य अन्यथा सिद्धि शून्य नियत पूर्ववृत्ति होता है वही कारण है जो प्रागभावका प्रतियोगी होताहै वहीकार्य है ॥ ३६॥

कारणं त्रिविधं समवाय्यसमवायिनिमित्त भेदात् । यत्समवेतंकार्यमुत्पद्यते तत्समवायि कारणम् । यथा तन्तवः पटस्य पटश्चस्वगतरूपा देः। कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति कारणमसमवायिकारणम्। यथा तंतुसंयोगः पटस्य । तंतुरूपं पटरूपस्य । तदुभयभिन्नं कारणं निमित्तकारणम् यथा तुरीवेमादिकं पटस्य । तदेत त्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव-करणम् ॥ ३७॥

कारण तीन प्रकारकाहै । वह इसप्रकारके हैं यथा—समवायि कारण, असमवायिकारण, और निमित्त कारण। जिसमें समवायसम्बन्धसे कार्य उत्पन्न होता है वह समवायि कारण है। उदाहरण—यथा—तन्तु—पटका, और पट—अपनेमें रहने वाले रूपादिका समवायि कारणहोता है। कार्य किम्वा कारणके साथ वर्तमानहोकर एकहस्थिल (जगह) में समवायसम्बन्धसे रह कर जो कारणहोता है वह असमवायि कारण कहाता है। उदाहरण—यथा—तन्तु संयोग यह—पटका और तन्तुरूप—यहपटरूपका असमवायिकारण होताहै ॥ समवायिकारण और असमवायिकारण से भिन्न—ऐसाजो कारण है

वह निमित्त कारण है । उदाहरणयथा—तुरी और वेम इत्यादिक यह पटके निमित्त कारण होते हैं । इनतीन प्रकारके कारणों के मध्य में जो असाधारण कारण है वही-करण है ॥ ३७ ॥

समवायिकारणं प्रकटयति—यस्मिन्समवेतं—यत्समवेतं सत्, समवायेन सम्बद्धंसत् कार्यम्—उत्पद्यते तत्समवायिकारणम् । पूर्वोदाहरणे—तन्तुषु समवायेन सम्बद्धं सत् पटात्मकं कार्यमुत्पद्यते इतितन्तवः पटस्य समवायि कारणमित्यर्थः । द्वितियोदाहरणेतु पटस्यरूपादिकं समवायसम्बन्धेन पटे एव उत्पद्यते इत्यर्थः । अतएव—समवायसम्बन्धेन कार्यवत्वं समवायिकारणस्य लक्षणमित्यर्थः । जन्यभावत्वावच्छिन्नंप्रति तादात्म्यसम्बन्धेन द्रव्यस्यैव कारणत्वात् तन्तवः पटस्येत्युक्तम् ॥ जन्यभावेषु द्रव्यगुणकर्मसु त्रिषु द्रव्यमेव समवायिकारणम्—इत्याशयेन "पटश्चस्वगतरूपादेः" इत्युक्तम् असमवायिकारणं लक्षयति—अत्रासत्तिर्द्विधा कार्यैकार्थैकार्थप्रत्यासत्तिः कारणै कार्यप्रत्यासत्तिश्च । तत्राद्या तन्तुसंयोगे द्वितीयाच तन्तुरूपे बोध्या । प्रथमं यथा—पटात्मककार्येण सहैकस्मिन्नर्थे तन्तौ समवेतं सत् समवाय सम्बन्धेन वर्तमानं सत् पटात्मकं कार्यं प्रति तन्तुसंयोगात्मकं कारणमसम वायिकारणमित्यर्थः । द्वितीयं--यथा—कारणेन सह पटरूपसमवायिकारणी भूतपटेन सह एकस्मिन्नर्थे तन्तुरूपेऽर्थे समवेतं सत् समवायसम्बन्धेन वर्तमानं सत् तन्तुरूपं पटरूपं प्रतिकारणं भवति अतोऽसमवायिकारणं तन्तुरूपं पटरूपस्य । असमवायिकारणं गुणकर्मणोरेव भवति ॥ लक्षणयंथा—समवायिस्वसमवायिसमवेतत्वान्यतरसम्बन्धेन समवायिकारणप्रत्यासन्न-कारणत्वमसमवायिकारणस्य लक्षणम् । समवाय्यसमवायिकारण तातिरिक्तकारणतावत्वं निमित्तकारणत्वम् । निमित्तकारणत्वे द्रव्यादीनां नियमो नास्तितदेतदिति—यस्मात्कारणात् करणत्वघटकं कारणमुपदर्शितं तस्मा देतत् त्रिविधसाधकमध्ये यत्साधकतमं तदेव करणमितिभावः पाणिनीयसूत्र मपि "साधकतमं करणम्" इति बोध्यम् । समाप्तोयं करणप्रपंचः ॥ ॥ १७ ॥

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्। इंद्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्द्विविधं। निर्विकल्पकम् सविकल्पकं च। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। यथेदं किंचित्। सप्रकारकं ज्ञानं सविकल्पकम्। यथा डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति ॥३८॥

प्रत्यक्ष, अनुमान, उपमान, और शब्द, ऐसे जो चार ४ प्रमाण पूर्व कह आये हैं उनमेंसे प्रत्यक्ष इस प्रमाणका यह लक्षण है कि जो प्रत्यक्ष ज्ञानका करण होताहै वह प्रत्यक्ष है। इन्द्रिय और अर्थ इनके सन्निकर्ष से उत्पन्न होनेवाला जो ज्ञान है वह प्रत्यक्ष ज्ञान कहाता है। यह प्रत्यक्ष ज्ञान २ प्रकार का है; १ एक निर्विकल्प और २ दूसरा सविकल्प। इनमें जो निष्प्रकारक ज्ञानहै वोह निर्विकल्प होताहै; उदाहरण यथा-"है कुछ" और जो सप्रकारक ज्ञान है वह सविकल्पहै। उदाहरण यथा। यह डित्थहै, यह ब्राह्मणहै, यह श्यामहै, इत्यादि ॥३८॥

प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षः षड्विधः। संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति

प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षस्यलक्षणम्। इन्द्रियार्थेति-इन्द्रियम्—चक्षुरादिकम् अर्थो घटादिः तयोःसन्निकर्षः संयोगादिः तज्जन्यं ज्ञानं प्रत्यक्षमित्यर्थः। विशेषणविशेष्यसम्बन्धावगाहि प्रत्यक्षं सविकल्पकम्। यथाऽयंघटइत्यादि। विशेषणविशेष्यसम्बन्धानवगाहि प्रत्यक्षं निर्विकल्पकम्। तच्चघटघटत्व इत्याकारकमतीन्द्रियम् ॥ ३८ ॥

चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः । घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः । चक्षुः संयुक्ते घटेरूपस्य समवायात् । रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः । चक्षुः संयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः । कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वाद् गुणगुणिनोश्च समवायात् । शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् । अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः।घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् । एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिंद्रियम् । तस्मादिन्द्रियम् प्रत्यक्षप्रमाणमिति सिद्धम् ॥३६॥

षड्विधसन्निकर्षमध्येप्रथममुदाहरति–द्रव्यचाक्षुषत्वाचमानसेषु संयोगएव सन्निकर्षः । द्रव्यग्रहस्तु संयोगेनैव भवतीतिनियमात् इहघटोऽस्तीति चक्षुरादे घटादिनासंयोगः । एवं मनसा संयोगेनआत्मग्रहः , अहमस्मीति ॥ द्वितीय मुदाहरति–चक्षुषा—द्रव्यसमवेतचाक्षुषरासनघ्राणजस्पार्शनमानसेषु संयुक्त समवाय एवसन्निकर्षः । संयुक्तसमवायेनैव गुणकर्मद्रव्यगतजातिग्रहः ।

प्रत्यक्षखण्डम् ।

प्रत्यक्ष ज्ञानका हेतुभूत ऐसाजो इन्द्रियार्थ सन्निकर्ष, पहले कह आये हैं वह छः ६ प्रकारका है। वह प्रकार यह है संयोग संयुक्तसमवाय, संयुक्तसमवेतसमवाय; समवाय, समवेत, समवाय, और विशेषणविशेष्यभाव । अपनेचक्षु से जहां आपघटका प्रत्यक्ष ज्ञान उत्पन्न होता है वहां संयोग यह सन्निकर्ष होता है । जहां घटमें रहनेवाले रूपका प्रत्यक्ष ज्ञान उत्पन्न होता है तहां संयुक्त समवाय यह सन्निकर्ष होता है क्योंकि अपने चक्षुसे घट संयुक्त होता है और उसमें रूप समवाय सम्बन्धसे रहता है। जहां घटरूपमें रूपत्व इसप्रकार की जातिका अपने आपको प्रत्यक्ष ज्ञान होता है वहां संयुक्त समवेतसमवाय यह सन्निकर्ष होता है। क्योंकि अपने चक्षु से घट संयुक्त होता है, उसमें रूप समवेत है, और उसरूपमें रूपत्व यहजाति समवाय सम्बन्धसे रहतीहै । अपनेश्रोत्रइन्द्रिय से जहां अपनेको शब्दका ज्ञान होता है वहां समवाय यह सन्निकर्ष होता है । क्योंकि अपना श्रोत्रेन्द्रिय अर्थात् अपने कानके विवर (भट्टे) के मध्यमें रहनेवाला आकाशही होताहै और शब्द यह आकाशका गुणहै; और गुण गुणी इनके मध्यमें निश्चय से समवाय सम्बन्ध होताहै । जहां अपने आपको शब्द में रहने वाली शब्दत्व इसजातिका साक्षात्कार होता है वहां समवेतसमवाय सन्निकर्ष होता है। क्योंकि शब्द यह श्रोत्र में समवेत होता है और उस शब्द में शब्दत्व समवाय सम्बन्धसे रहता है। और जहां अपने आपको अभावका प्रत्यक्षकरना है वहां विशेषणविशेष्यभाव यह सन्निकर्ष होता है। घटके अभावसे युक्त यह भूतल है, इसजगह भूतलयह अपने चक्षुसे संयुक्त होता है और उसमें घटभाव यह है विशेषण रहता है। इसप्रकार इन छःसन्निकर्षोंसे उत्पन्न होनेवाले जो ज्ञानहै वही प्रत्यक्ष ज्ञानहै। और इन्द्रिय यहप्रत्यक्ष ज्ञानका कारण है। इसकारण इन्द्रिय यह प्रत्यक्ष प्रमाण अर्थात् प्रत्यक्ष प्रमाका करण है ऐसा सिद्ध होता है ॥ ३९ ॥

इह घटे रूपं चलनं द्रव्यत्वादिकमस्ति अत्रचक्षुषासंयुक्तोघटः तस्मिन् घटेरूपादीनां समवायेन स्थितिः ॥ तृतीयमुदाहरति—रूपत्वात्मकं यत्सामान्यं तत्प्रत्यक्षे इत्यर्थः । तथाचचक्षुषा—द्रव्यसमवेतसमवेत चाक्षुषरासनघ्राणजस्पार्शनमानसेषु संयुक्तसमवेतसमवायसंन्निकर्षः-संयुक्तसमवेतसमवायेन-गुणकर्मजातिग्रहो भवति घटगतरूपे रूपत्वादिक मस्ति घटगतचलने कर्मत्वादिकमस्तीति अत्र चक्षुरादिसंयुक्तो घटस्तत्र समवेतमर्थात् समवायेन सम्बद्धं रूपादि चलनञ्चवर्तते तत्रापि रूपत्वादेः कर्मत्वादेः समवायोऽस्तीति बोध्यम् । चतुर्थमुदाहरति–समवायेन–शब्दग्रहः । इह वीणाशब्दोऽस्तीति । वीचीतरंगन्यायेन कदम्बमुकुलन्यायेन वा शब्दाच्छब्दान्तरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य श्रोत्रसम्बन्धात्प्रत्यक्षत्वसंभवाद्दूरस्थशब्दस्यापीति ज्ञेयम् ॥ पंचममुदाहरति—समवेतसमवायेन शब्दत्वादि ग्रहः। इह शब्दे शब्दत्वगुणत्वादिकमस्तीति श्रोत्रसमवेतः शब्दस्तत्र समवायेन शब्दत्वमप्यस्तीति बोध्यम् । षष्ठमुदाहरति–विशेषणतया समवायाभावयोर्ग्रहः। अभावप्रत्यक्षे–घटाभाववद्भूतलमित्यत्र भूतलं विशेष्यं घटाभावो विशेषणम् । इह भूतलेघटो नास्तीत्यत्रसम्पन्तस्याविशेषणत्वात् ननु चक्षुरादिना कथमभावस्य ग्रहः—तदुत्तरयति— "येनेन्द्रियेण यद्गृह्यते तेनेन्द्रियेण तद्गतं सामान्यं तत्समवायस्तदभावश्च गृह्यते" इति नैयायिक-नियमः ॥ ३९ ॥

इतिश्रीसारस्वतविप्रवंशोद्भवश्रीमन्नारायण
शास्त्रिसूनुवैद्यनाथशास्त्रिकृतायां
सुलक्षणलक्षितटिप्पणीयुतायां
भाषाटीकायां प्रत्यक्षखण्डः
समाप्तः ॥

अथानुमानखण्डम् ॥

अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः । व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा वन्हिव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वन्हिमानिति ज्ञानमनुमितिः । यत्र यत्र धूमस्तत्रतत्राग्निरिति साहचर्यनियमोव्याप्तिः । व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ॥४०॥

प्रत्यक्षानुमानयोः कार्यकारणभावसंगतिमभिप्रत्य प्रत्यक्षानन्तरमनुमानं निरूपयति । अनुमितौ व्याप्तिज्ञानं करणं, परामर्शो व्यापारः, अनुमितिः फलंकार्यमित्यर्थः । परामर्शस्य व्याप्तिज्ञानजन्यत्वात् व्याप्तिज्ञानजन्यानुमिति जनकत्वाच्च " तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारलक्षणमुपपन्नम् । अनुमितिकरणत्वमनुमानस्य लक्षणम् । परामर्शजन्यत्वविशिष्टज्ञानत्वमनुमितेर्लक्षणम् । व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं परामर्शस्यलक्षणम् । अनुमानञ्च धूमो वह्निव्याप्य इतिज्ञानम् । वह्निव्याप्य धूमवानयमिति तृतीयलिंगपरामर्शो व्यापारः कथमस्य तृतीयत्वं तदुच्यते—महानसादौ दृष्टान्ते वन्हिधूमयोर्भूयः सहचारदर्शनात् व्याप्यत्वेन धूमज्ञानं प्रथमम् । ततः पर्वते धूमं दृष्ट्वा व्याप्यत्वेन तत्स्मरणं द्वितीयम् । ततस्तत्रैव व्याप्यत्वेन धूमस्य परामर्शो वन्हिव्याप्यधूमवानयमित्येवं रूपोजायत इति तृतीयत्वं तस्येति बोध्यम् लिंगज्ञानजन्यं लिंगिज्ञानमनुमितिः । यथा–पर्वतादौ धूमज्ञानानन्तरं पर्वतो वन्हिमानिति ज्ञानम् । व्याप्तिपक्षधर्मतावल्लिंगम् । ननु केयं व्याप्तिरितिचेदुच्यते

अनुमिति का जो करण है वह अनुमान है परामर्श से जो ज्ञान उत्पन्न होता है वह अनुमिति है व्याप्तिविशिष्ट पक्षधर्मता ज्ञानको परामर्श कहते हैं। उदाहरण यथा यह पर्वत अग्नि व्याप धूमवान् है, यहही ज्ञान परामर्श है। और इस प्रकारके ज्ञानसे उत्पन्न होनेवाले "यह पर्वत अग्निमान् है" यह ज्ञान अनुमिति है। जहां २ धूम होता है वहां २ अग्निहोती है इस प्रकारका जो साहचर्य नियम है वहही व्याप्तिहै। और व्याप्यका पर्वतादिमें रहनाही पक्षधर्मताहै ४०

अनुमानं द्विविधं स्वार्थं परार्थं च। स्वार्थं स्वानुमितिहेतुः। तथाहि स्वयमेव भूयो भूयो दर्श-

---

साहचर्यनियम इति ॥ एतदर्थस्तु 'नियतसाहचर्यं व्याप्तिः' इति । नियतत्वं व्यापकत्वम्। साहचर्यं नाम सामानाधिकरण्यम् तथाच 'धूमव्यापकवन्हिसामानाधिकरण्यं व्याप्तिः' इत्यर्थः ॥ अत्र धूमव्यापकत्वं नाम धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्। तादृशधर्मो वन्हौ वान्हित्वम्। तथाहि—धूमाधिकरणे ॥ पर्वतमहानसचत्वरादौ वर्तमानोऽभावः घटत्वावच्छिन्नप्रतियोगिताकाभावो, न तु वन्हित्वावच्छिन्नप्रतियोगिताकोऽभावः । कुतः—पर्वतादौ वन्हेः सत्वात् । एवं सति धूमाधिकरणे पर्वतादौ वर्तमानस्य घटाभावस्य प्रतियोगितावच्छेदकं घटत्वम्, पटाभावस्य प्रतियोगितावच्छेदकं पटत्वम्, अनवच्छेदकं वान्हित्वम् तादृशं वन्हित्वं वन्हौ वर्तते। अतो धूमव्यापकत्वं वन्हौ वर्तते, (तस्याधिकरणे पर्वतादौ वृत्तित्वं धूमे वर्तते) इति। इयमन्वयव्याप्तिः सिद्धान्तानुसारेण ॥

का पुनः पक्षधर्मता। पक्षाश्रयवृत्तित्वं पक्षधर्मता पक्षतानुमित्साविरहविशिष्टसाध्यनिश्चयाभावः। अस्तिचेदं पर्वतादौ पक्षेऽनुमित्साविरहविशिष्टसाध्यनिश्चयस्तत्राभावात्पर्वतादौ साध्यानिश्चये सत्यपि, सत्यां चानुमित्सायां पर्वतो वह्निमान्धूमादित्यनुमानसंभवात्। तत्र पक्षतासंपत्तयेऽनुमित्साविरहविशिष्टत्व साध्यनिश्चयविशेषणम् । तथा चानुमित्साविरहाविशिष्टसाध्यनिश्चस्य तत्राभावात्पक्षता ॥ ४० ॥

नेन यत्र यत्र धूमस्तत्रतत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गत्वा तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति। तदनंतरं वन्हिव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात्पर्वतो वन्हिमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्। यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुंक्ते तत्परार्थानुमानम्। यथा पर्वतो वन्हिमान्धूमवत्त्वात्। यो यो धूमवान्स स वन्हिमान्। यथा महानसः। तथा चायम्। तस्मात्तथेति। अनेन प्रतिपादिताल्लिंगात् परोऽप्यग्निं प्रतिपद्यते॥ ४१॥

न्यायाप्रयोज्यानुमानम्—स्वार्थानुमानम्। स्वस्यार्थः प्रयोजनं यस्मात्तत्स्वार्थमितिसमासः। स्वप्रयोजनंच स्वस्यानुमेयप्रतिपत्तिः॥ न्यायप्रयोज्यानुमानं परार्थानुमानम्। न्यायत्वं चोचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वम् यत्पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम् इतिसम्बन्धः। अवयवत्वंनाम द्रव्यसमवायिकारणत्वम् 'प्रतिज्ञादिषु तदसंभवात्कथंतेऽवयवाःस्युरिति चेत्—अनुमानवाक्यैकदेशत्वात्तु अवयवा, इत्युपचर्यन्ते इतिगृहाण। लिंगपरामर्शप्रयोजकलिंगप्रतिपादकत्वेन अनुमानम् इत्युपचारमात्रत्वाद्वा॥ ४१॥

अनुमान दो प्रकारका है, एक १ स्वार्थ (अपने लिये) और दूसरा २ परार्थ (दूसरे के लिये) । अपने आपको स्वतःही जो अनुमिति का ज्ञान होता है अर्थात् अपने आपको अनुमान कियाजाता है वह स्वार्थानुमान है । उदाहरण यथा—जहां धूम है वहां अग्नि है इस प्रकार जैसे महानस (पाकगृह अर्थात् रसोईखाना) आदि के स्थान में अनेकवार धूम और अग्नि इन दोनों के बीचमें (मध्य में) व्याप्ति होती है ऐसा मनुष्यको स्वतःही गृह होता है । अनन्तर वह किसी पर्वत के समीपमें जाताहै और उस पर्वत पर अग्नि है किंवा नहीं इस प्रकारका उसको सन्देह उत्पन्न होता है । परन्तु इतनेहीमें पर्वत में धूम है यह देखता है । और जहां धूमहैं वहां अग्नि होता है इस व्याप्ति का उसको स्मरण होता है । उसके अनन्तर यह पर्वत वह्नि व्याप्य धूमवान् है ऐसा ज्ञान उत्पन्न होता है । इसकोही लिङ्गपरामर्श कहते हैं । इस लिङ्गपरामर्श सेही पर्वत वह्निमान् है ऐसा अनुमितिरूप ज्ञान उत्पन्न होता है । इस प्रकार का जो अनुमान है वह स्वार्थानुमानहै ॥ परन्तु अपने आपही धूमको देखकर अग्नि विषयके अनुमान करने के अनन्तर दूसरे के समुझादेने के लिये जहां कोई पञ्चावयव युक्त वाक्य का प्रयोग करता है वहां परार्थानुमान होता है । अब उपरोक्त पंचावयव वाक्यों का वर्णन करते हैं यथा—यह पर्वत वह्नि वालादीखता है । क्योंकि यह धूमवान् है । जो २ धूमवान् होताहै वह २ वह्निमान होता है, जैसे महानस । यह पर्वत वैसेही धूमवान है । तहां वह तैसा—अर्थात् वह्निमान मालूम होता है । इस प्रकार के प्रतिपादन करनेपर लिङ्गसे पर्वत में आग्निहै ऐसा दूसरेको जो ज्ञान कराना है यहही परार्थानुमानहै ॥ ४१ ॥

प्रतिज्ञाहेतुदाहरणोपनयानिगमनानि पञ्चा

वयवाः। पर्वतोवन्हिमानिति प्रतिज्ञा। धूमवत्त्वादिति हेतुः। यो यो धूमवानित्युदाहरणम्। तथा चायमित्युपनयः। तस्मात्तथेति निगमनम्॥ ४२॥

प्रतिज्ञा, हेतु, उदाहरण, उपनय, और निगमन, यह पांच, ५ अवयव हैं यह पर्वत अग्निवाला है यही प्रतिज्ञा है। क्योंकि वह धूमवाला होनेसे यह हेतु है। जो २ धूमवान् होता है वह वह अग्निमान् होता है जैसे महानस यह उदाहरण है। यह पर्वत वैसही है अर्थात् धूमवान है यही उपनय है। इसलिये वह वैसाही है अर्थात् अग्निमान ऐसा मालूम होताहै यही निगमन है॥ ४२॥

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्॥ ४३॥

पक्षे साध्यनिदेशः प्रतिज्ञा। तथाच पक्षतावच्छेदकावच्छिन्न विशेष्यता निरूपित साध्यतावच्छेदकावच्छिन्नप्रकारताशालिशाब्दबोधजनकवाक्यत्वे सति न्यायावयवत्वंप्रतिज्ञाया लक्षणम्॥ पंचम्यन्तं तृतीयान्तंवा हेतुप्रतिपादकवाक्यं हेत्वावयवः। तथाच हेतुप्रतिपादकविभक्तिमन्न्यायावयवत्वं हेतोर्लक्षणम्॥ व्याप्तिप्रतिपादकदृष्टान्तवचनम्—उदाहरणम्— तथाच—अनुमितिहेतुलिंगपरवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणस्य लक्षणम्॥ उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकं वचनमुपनयः। तथाच—अनुमितिकरणतृतीयलिंगपरामर्श जनकावयवत्वमुपनयस्य लक्षणम्॥ अबाधितत्वासत्प्रतिपक्षितत्वतात्पर्यकं वाक्यं निगमनम्—तथाच—अनुमितिहेतुलिंगपरामर्शप्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षधर्मताधीप्रयुक्तसाध्यधीजनकवाक्यत्वं निगमनस्यलक्षणम् ४२॥

स्वार्थानुमिति और परार्थानुमिति इनदोनों काही लिङ्ग परामर्शही करण है इससे यह प्रगट होताहै कि लिङ्ग परामर्श ही अनुमान कहाजाता है ॥ ४३ ॥

लिङ्गं त्रिविधम् । अन्वयव्यतिरेकि केवलान्वयि केवलव्यातिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यातिरेकि । यथा वन्हौ साध्ये धूमवत्वम् । यत्र धूमस्तत्राग्निर्यथा महानस इत्यन्वयव्याप्तिः । यत्रवन्हिर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेक व्याप्तिः । अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा घटोऽभिधेयः प्रमेयत्वातपटवत् । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति । सर्वस्य प्रमेयत्वादाभिधेयत्वाच्च । व्यातिरेकमात्रव्याप्तिकं केवलव्यातिरेकि । यथा पृथिवीतिरेभ्यो भिद्यते गन्धवत्वात् । यदितरेभ्यो न भिद्यते न तद्गन्धवत् । यथा जलम् । न चेयं तथा । तस्मान्न

ज्ञायमानं लिंगमनुमितिकरणं इति वृद्धोक्तं नयुक्तं इयं "यज्ञशाला वह्निमती अतीतधूमत्वात्" इत्यादौ लिंगाभावेऽप्यनुमितिदर्शनात् इत्याभिप्रायवान् "लिंगपरामर्श एव करणम्" इत्याचष्टे मूलग्रन्थस्तु फलायोगव्यवच्छिन्नं कारणं करणं इतिमतमवलम्ब्य इति बोध्यम् ॥ ४३ ॥

तथेति। अत्र यद्गन्धवत्तादितरभिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् ॥ ४४ ॥

लिङ्ग तनिप्रकारकाहै; अन्वयव्यतिरेकि, केवलान्वयि और केवलव्यतिरेकि अन्वयसे और व्यतिरेकसे ऐसे दोनोंहीप्रकारसे जिसकी व्याप्ति सम्भवहो वह अन्वयव्यतिरेकि लिंगहोताहै ॥

अन्वयप्रयोज्यव्याप्तिमद् व्यतिरेकप्रयोज्यव्याप्तिमद् अन्वयव्यतिरेकिणोलक्षणम् । "व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते । तयोरभावयोस्तस्माद्विपरीतःप्रतीयते ॥ अन्वयेसाधनं व्याप्यं साध्यं व्यापकमिष्यते । साध्याभावोन्यथा व्याप्यो व्यापकः साधनात्ययः ॥" इति । यत्रान्वयव्याप्तिर्व्यतिरेकव्याप्तिश्चकथ्यते तदन्वयव्यतिरेकि । यथापर्वतो वह्निमान्धूमादित्यादि । अत्रच पर्वतःपक्षः, तस्यवह्निमत्त्वं साध्यं, धूमादितिहेतुस्तस्मिन् । यत्रयत्र धूमस्तत्रतत्रवह्निः । यथामहानसादौ इत्यन्वयव्याप्तिः । यत्र यत्र वह्न्यभावस्तत्र तत्रधूमाभावः । यथाजलमहाह्रदादौ । इतिव्यतिरेकव्याप्तिश्चास्ति । पूर्वतः क्वचिद्वैलक्षण्यमुच्यते "अन्वयेसाधनं व्याप्यं साध्यं व्यापकमिष्यते । साध्याभावोऽन्यत्र व्याप्यो व्यापकःसाधनात्ययः । व्याप्यस्यवचनं पूर्वं व्यापकस्य ततःपरम् । एवंपरीक्षिताव्याप्तिः स्फुटीभवति तत्वतः ॥" इति व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वं केवलान्वयित्वम् । यत्रान्वयव्याप्तिरेवास्ति तत्केवलान्वयि यथाघटोऽभिधेयः प्रमेयत्वादिति । अत्रघटः पक्षः तस्याभिधेयत्वं साध्यम् । प्रमेयत्वंहेतुः । तस्मिन्यत्रयत्र प्रमेयत्वं तत्र तत्राभिधेयत्वम् । यथाघट इत्यन्वयव्याप्तिरेवास्ति । नतुयत्रयत्रसाध्याभावस्तत्रतत्र हेत्वभाव इतिव्यतिरेकव्याप्तिः अभिधेयस्य प्रमेयत्वस्यच सर्वत्र सत्वात् साध्याभावादेरेवाप्रसिद्धत्वात् ॥ अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्वं केवलव्यतिरेकत्वम् । यत्रव्यतिरेकव्याप्तिरेवास्ति तत्केवलव्यतिरेकि । यथा जीववच्छरीरं सात्मकं प्राणादिमत्वादित्यादि । अत्रजीववच्छरीरंपक्षः । तस्यसात्मकत्वं साध्यम् । प्राणादिमत्वं हेतुः । तस्मिन्यत्रयत्र सात्मकत्वाभावस्तत्रतत्र प्राणादिमत्वाभावः यथाघटादौइतिव्यतिरेकव्याप्तिरेवास्ति । ननुयत्रयत्र प्राणादिमत्वंतत्र सात्मकत्वमित्यन्वयव्याप्तिर्दृष्टान्ताभावाज्जीववच्छरीरमात्रस्य पक्षीकरणात् अन्यत्र च हेतुसाध्ययोरेवासत्वात् ॥ ४४ ॥

उदाहरणयथा—वह्निसाध्य होनेमें धूमत्व यह अन्वय व्यतिरेकि लिङ्ग होताहै। जहाँ धूम है वहीं वह्नि है जैसे महानसमें यहही अन्वय व्याप्ति है। और जहाँ वह्नि नहीं है वहाँ धूमभी नहीं है जैसे महाह्रदमें यहही व्यतिरेकि व्याप्ति है जिस जगह अन्वयव्याप्ति मात्र सम्भव होताहै वह केवलान्वयि लिङ्ग होताहै। उदाहरणयथा—घट अभिधेयहै क्योंकि प्रमेय होनेसे, जो प्रमेय होताहै वह अभिधेय होताहै जैसे पट इसजगह प्रमेयत्व अभिधेयत्व इनके मध्यमें व्यतिरेकि व्याप्ति नहींहै। क्योंकि सबही पदार्थ प्रमेय और अभिधेय होताहै। जहाँ व्यतिरेक व्याप्तिमात्र सम्भवहोताहै ऐसा जो लिङ्ग वह केवल व्यतिरेकि कहाता है। उदाहरण यथा—पृथ्वी इतर द्रव्योंसे भिन्न है। क्योंकि उसमें गन्ध है। जो इतर द्रव्यों से भिन्न नहीं उसमें गन्धभी नहीं है, जैसे जल के बीच नहीं। पृथ्वी उसप्रकार की नहीं, अर्थात् गन्धाभाववती नहीं, तो गन्धवती है। इस लिये जो वैसे नहीं है अर्थात् वह इतर भेदाभाववतीभी नहीं है, तो इतर भेदवतीहै। इस उदाहरणमें जो गन्धवत्व है वह इतर भिन्नहै यही अन्वयव्याप्ति के मध्यमें उसका दृष्टान्त नहीं मिलता क्योंकि सब पृथ्वीही को यहाँपर पक्षमान लिया है॥ ४४॥

संदिग्धसाध्यवान्पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः। निश्चितसाध्यवान्सपक्षः। यथा तत्रैव महानसः। निश्चितसाध्याभाववान्विपक्षः। यथा तत्रैव महाह्रदः॥ ४५॥

त्रयाणांमध्ये योऽन्वयव्यतिरेकी स पञ्चरूपोपपन्नएव स्वसाध्यंसाधयति। तानि पंचरूपाणि पक्षधर्मत्वं, सपक्षेसत्वं, विपक्षाद्व्यावृत्तिः, अबाधितविषयत्वम्, असत्प्रतिपक्षत्वञ्चेति। पक्षताश्रयवृत्तित्वं पक्षधर्मत्वम्। निश्चितसाध्यवान्सपक्षः तत्र विद्यमानत्वं सपक्षसत्वम्। निश्चितसाध्याभाववान्विपक्षः—

जिसमें साध्य है किंवा नहीं इसप्रकारकाजो सन्देह होता है वह पक्ष है' उदाहरण यथा—धूम से अग्निका अनुमान करनेपर यहाँ पर्वत यह पक्ष होता है। इसमें साध्य रहता है ऐसे निश्चय होने पर वह सपक्ष होता है, उदाहरण यथा—उस के अनुमान में महानस यह सपक्ष है। और जहां साध्यका अभाव रहता है ऐसा जहां निश्चय होता है वह विपक्ष कहलाता है उदाहरण यथा-इसी अनुमान में महाह्रद यह विपक्ष है ॥ ४५ ॥

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः। सव्यभिचारोऽनैकान्तिकः। सत्रिविधः। साधारणासाधारणानुपसंहारिभेदात्। तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वन्हिमान्प्रमेयत्वादिति-प्रमेयत्वस्य वन्ह्यभाववति ह्रदे विद्यमानत्वात्। सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः। यथा शब्दो नित्यः शब्दत्वादिति। शब्दत्वं सर्वेभ्यो-नित्येभ्योऽनित्येभ्यश्चव्यावृत्तं शब्दमात्रवृत्ति।

तत्राविद्यमानत्वं विपक्षाद्व्यावृत्तिः। प्रमाणान्तरेणाप्रमितसाध्याभावकत्वम-बाधितविषयत्वम्। साध्याभावसाधकहेत्वन्तरशून्यत्वमसत्प्रतिपक्षत्वम्। एतानि पंचरूपाणि वह्निसाधकधूमादावन्वयव्यतिरेकिणि विद्यन्ते। केवलान्वयिनि विपक्षाद्व्यावृत्तिर्नास्ति विपक्षाप्रसिद्धः। केवलव्यतिरेकिणि सपक्षे सत्वंनास्ति सपक्षाप्रसिद्धेः॥ साध्यप्रकारकसंदेहविशेष्यत्वं पक्षत्वम्। साध्यप्रकारकनिश्चयविशेष्यत्वं सपक्षत्वम्। साध्याभावप्रकारकनिश्चयविशेष्यत्वं विपक्षत्वम्॥ ४५॥

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा-सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति। साध्याभावव्याप्यो हेतुर्विरुद्धः यथा शब्दो नित्यः कृतकत्वादिति। कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्। साध्याभावसाधकं हेत्वन्तरं यस्य विद्यते स सत्प्रतिपक्षः यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववदिति। शब्दोऽनित्यः कार्यत्वाद्घटवदिति। असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा गगनारविन्दं सुरभ्यरविन्दत्वात। सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः। सच नास्त्येव। स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्देनास्ति शब्दस्य श्रावणत्वात्। सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभावाप्रतियोगित्वं साधानाव्यापकत्वम्।

पर्वतो धूमवान्वन्हिमत्त्वादिति। अत्रार्द्रेन्धनसंयोग उपाधिः। तथाहि। यत्रधूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता। यत्र वन्हिस्तत्रार्द्रेंधन संयोगो नास्ति। अयोगोलक आर्द्रेंधनसंयोगाभावादितिसाधनाव्यापकता। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेंधनसंयोग-उपाधिः। सोपाधिकत्वाद्वन्हिमत्वं व्याप्यत्वासिद्धम्॥ यस्य साध्याभावः प्रमाणांतरेण निश्चितः सबाधितः यथा वन्हिरनुष्णो द्रव्यत्वादिति अत्रानुष्णत्वंसाध्यं तदभाव उष्णत्वं स्पार्शन प्रत्यक्षेण गृह्यते इति बाधितत्वम् ४६॥

अथ हेत्वाभासत्वज्ञानस्यापि परोक्तहेतौ दोषोद्भावनद्वारा सद्धेतुत्वज्ञानोपयोगितया हेत्वाभासानां सामान्यविशेषलक्षणान्युच्यंते। अनुमिति तत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभाससामान्यलक्षणम्। साध्यसाधनग्रहाविरोधित्वे सति व्याप्तित्वावच्छिन्नप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नविशेष्यताशालिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपित प्रतिबन्धकताशालियथार्थज्ञानविषयत्वं व्यभिचारसामान्य लक्षणम्, विपक्षवृत्तित्वं साधारणत्वम्। सर्वसपक्षव्यावृत्तित्वमसाधारणत्वम्। अत्यन्ताभावाप्रतियोगिसाध्यादिकत्वम् अनुपसंहारिणोलक्षणम्। साधारणज्ञानञ्च विपक्षवृत्तित्वरूपव्यभिचारविषयकत्वात् व्यभिचारज्ञानविधयाव्याप्तिग्रहे प्रतिबन्धकम् व्यभिचार ज्ञानेसति व्याप्तिग्रहानुदयस्य सुप्रसिद्धत्वात्।

सव्यभिचार विरुद्ध, सत्प्रतिपक्ष, असिद्ध, और बाधित यह पांच हेत्वाभासहैं। इनमें जो अनैकान्तिकहै वही सव्य भिचार है। वह साधारण असाधारण और अनुपसंहारि ऐसा तीन प्रकारका है। इनतीनों में साध्यका अभाव जहां रहे वहां रहने वाला जो हेतु है वह साधारण है। उदाहरण यथा—पर्वत वह्निमान है क्योंकि उसमें प्रमेयत्व है इस अनुमान में प्रमेयत्व यह हेतु साधारण है कारणकि इस अनुमान में प्रमेयत्व यह हेतु साध्यजो अग्नि उसका अभाव जो ह्रद उसमेभी रहता है अतएव ह्रद यह जानने के योग्य ऐसा पदार्थ (प्रमेय) हैही सर्व, सपक्ष, और विपक्षसे व्यावृत्तहोकर जो हेतु रहता है उस को असाधारण जानना। उदाहरण यथा—शब्द नित्य है वह शब्दत्व से रहता है इस जगह नित्यत्व यह साध्य है। इस लिये सर्व नित्यवस्तु सपक्ष होता है और सर्व अनित्यवस्तु विपक्ष होता है परन्तु शब्दत्व यह हेतु ऐसा है कि वह नित्य किंवा अनित्य इन दोनोंमें से किसी जगहभी नही रहता किन्तु केवल शब्द के स्थान में ही रहता है इसलिये सर्व, सपक्ष, और विपक्ष इनसे व्यावृत्त होनेवाला शब्दत्व यह हेतु असाधारण है। जिसका अन्वय व्याप्तमें और व्यतिरेकव्याप्तिमें दृष्टान्त नही देसके ऐसा जो हेतु है वह अनुपसंहारि है ऐसा जानना। उदाहरण यथा—सर्व अनित्य है इसी से वह प्रमेय हैं यहां सर्व यह यावत् सम्पूर्ण वस्तुओं में अन्तर्भाव होने के कारण से दृष्टान्त देनेमें कोई और नही बाकीरहता इस लिये यहहेतु अनुपसंहारि है ऐसा जानना। जो हेतु साध्याभावव्याप्तहोताहै यह विरुद्ध है। उदाहरण यथा— शब्द नित्य है कारणकि वह कृतक (कृत्रिम) है यहां नित्यत्व यह साध्यहै और इसका अभाव जो अनित्यत्व उसमें यह कृतकत्व हेतु व्याप्त है क्योंकि जहां २ कृतकत्व है वहां २ अनित्यत्व है ऐसा देखा जाता है। जो कृतक है वह नित्य

है ऐसा किसी प्रकार नहीं सिद्ध हो सक्ता इस लिये यह विरुद्ध नामक हेत्वाभास है ऐसा जानना । जिस हेतु के साध्य के अभाव का साधक ऐसा दूसरा हेतु कोई हो वह सत्प्रतिपक्ष होता है । उदाहरण यथा—शब्दानित्य है क्योंकि वह श्रावण (श्रवणेन्द्रियसे ग्रहण करने योग्य है) जैसे शब्दत्व। और शब्द यह अनित्य है क्योंकि वह कार्य (उत्पन्न होनेमें कृतक) है जैसा घट इनदोनों अनुमानों के मध्यमें पहले अनुमानमें श्रावणत्व इस हेतुसे नित्यत्व यह साध्य सिद्ध कराजाता है। परन्तु इस अनुमानमें नित्यत्व इस साध्यका अभाव अर्थात् अनित्यत्व यह सिद्ध करने मे कार्यत्व जो यह हेतु दूसरे अनुमान मे दिया है इस कारण श्रावणत्व यह सत्प्रतिपक्षहेतु होता है। असिद्ध तीन प्रकारका है वह प्रकार यह हैं, आश्रयासिद्धि स्वरूपासिद्ध और व्याप्यत्वासिद्ध इनमें आश्रयासिद्धिका उदाहरण देते हैं यथा-गगनारविन्द (आकाश का कमल) सुरभि है क्योंकि उसमें अरविन्दत्व यह धर्म रहता है। जहां अरविन्दत्व है वहां सुरभित्व है जैसे सरोवामें उत्पन्न होनेवाले कमल में इस जगह गगनारविन्द यह आश्रय है इसमें सुरभित्व यह रहता है ऐसा सिद्ध करना है । परन्तु वह आश्रय जड़ मूलसे ही प्रसिद्ध नहीं कारण कि अरविन्द (कमल) यहतो जो प्रसिद्ध है परन्तु आकाश में कमल प्रसिद्ध नहीं है इस कारण गगनारविन्द यह आश्रयही नहीं इसलिये आश्रयासिद्ध यह हेत्वाभास होता है ऐसा जानना। स्वरूपासिद्धि के उदाहरण में प्रमाण यथा-शब्द नित्य है क्योंकि वह चाक्षुष (चक्षुइन्द्रिय से ग्रहण करने योग्य) है इस जगह चाक्षुषत्व यह हेतु स्वरूपासिद्ध है क्योंकि शब्द इस पक्षके स्थान में चाक्षुषत्व इस हेतुका स्वरूपतःही अभावहै। कारण कि शब्द यह चक्षुरिन्द्रिय ग्राह्य नहीं किन्तु श्रोत्रेन्द्रिय ग्राह्य है। जो हेतु सोपाधिक होताहै वह व्याप्यत्वासिद्ध है। साध्यव्यापक होकर जो साधनाव्यापक होता है वही उपाधि है।

साध्यव्यापकत्व का अर्थ यह है यथा—साध्यसमानाधि करणात्यन्ताभावाप्रतियोगित्व । और साधनाव्यापकत्व इस का अर्थ । साधनवन्निष्ठात्यंताभावप्रतियोगित्व होता है । वह पर्वत धूमवान् है क्योंकि वह वह्निमान् होने से इस जगह आर्द्रेन्धन संयोग यह उपाधि है क्योंकि आर्द्रेधन संयोगसाध्य व्यापक होकर साधनाव्यापक है जहां धूम है वहां आर्द्रेन्धन संयोग है इस लिये वह साध्यव्यापक है । और जहां वह्नि है वहां आर्द्रेन्धन संयोग नहीं है उदाहरण यथा-तपे हुये लोहे के गोले में वह्नि है परन्तु आर्द्रेन्धन संयोग नहीं है इस कारण आर्द्रेन्धन संयोग यह साधनाव्यापक है ऐसा सिद्ध होता है।

साक्षादनुमितिप्रतिबन्धकम् । कथमितिचेत् इत्थम्—शब्दत्वं हि नान्वयीहेतुः दृष्टान्ताभावात् । किन्तुव्यतिरेकी । तथाचयोयद्वतो व्यावृत्तः सस्वाश्रयेतदभावं साधयति । यथाधूमोवह्न्यभाववतो जलहृदादेर्व्यावृत्तः स्वाश्रये पर्वतादौ वह्न्यभावाभावं साधयति ।। तथा शब्दत्वं नित्यत्ववतो गगनादेः सपक्षादव्यावृत्तमिति स्वाश्रये शब्दे नित्यत्वाभावमनित्यत्वं साधयेत् । एवं नित्यत्वाभाववतो घटादेर्विपक्षाद् व्यावृत्तमिति स्वाश्रये शब्दे नित्यत्वाभावाभावमं नित्यत्वमपि साधयेत् । नचैकत्रशब्दे नित्यत्वानित्यत्वयोः संभवः तयोर्विरोधात् । तस्माच्छब्दत्वेऽसाधारणत्वज्ञाने सति न साध्यानुमितिरिति ॥ अनुपसंहारिज्ञानमपि— व्याप्तिग्रहे प्रतिबन्धकम्, सर्वस्य पक्षत्वे व्याप्तिग्राहक सहचारदर्शनस्थलाभावेन सहचारानिश्चयाभावे सति व्याप्तेरनिश्चयात् । साध्यव्यापकीभूताभावप्रतियोगित्वं विरुद्धस्य लक्षणम् । एतज्ज्ञानञ्च साक्षादनुमिति प्रतिबन्धकम् । अयंगौरश्वत्वादितिविरुद्धस्योदाहरणे यत्रयत्राश्वत्वं तत्रतत्र गोत्वाभाव इतिसाध्याभावव्याप्तेः सत्वादश्वत्वंहेतुर्विरुद्धः । अत्रगोत्वाभाव व्याप्ताश्वत्ववत्ताज्ञाने सतिगोत्वनिश्चयासंभवात् इति । पक्षसाध्यग्रहाविरोधित्वे सति साध्याभावत्वावच्छिन्नविधेयतानिरूपित पक्षतावच्छेदकावच्छिन्नोद्देश्यताशाल्यनुमितित्वावच्छिन्नजन्यता निरूपितिजनकताशालियथार्थज्ञान विषयत्वम् सत्प्रतिपक्षस्य लक्षणम् ॥ यस्य हेतोःसाध्याभावसाधकं साध्याभावस्यानुमापकं हेत्वन्तरं प्रतिपक्षः हेतुर्विद्यते स हेतुः सत्प्रतिपक्षः इत्यर्थः । अयमेव ‘प्रकरणसमः ” इत्युच्यते । अत्र द्वयोरपि हेत्वोः परस्परसाध्याभावसाधकत्वान्मिथः सत्प्रतिपक्षत्वम् । एतज्ज्ञानञ्च साक्षानुमितिप्रतिबन्धकम् । मूलोक्ताद्विविध

इस रीति सें आर्द्रेन्धन संयोग यह साध्यव्यापक और साधनाव्यापक होकर उपाधि है ऐसा सिद्धहोता है और यहां वह्निमत्व यह हेतु सोपाधिक अर्थात् आर्द्रेन्धन संयोग इस उपाधिके साथ होकर व्याप्यत्वासिद्ध है ऐसा जानना । जिस के साध्य का अभाव दूसरे प्रमाण से निश्चित होताहै वह वाधित है उदाहरण यथा—वह्नि अनुष्ण है क्योंकि वह द्रव्य है इस जगह अनुष्णत्व यह साध्य है इसका अभाव जो उष्णत्व है वह वह्नि में रहताहै इसका ज्ञान स्पर्शजन्य प्रत्यक्षसे अपने आप होताही है इस लिये द्रव्यत्व यह हेतु वाधित है ४६ ॥

परामर्शे सत्येकस्मादप्यनुमितेरभावात् परस्परप्रतिवन्धात् । आश्रयासिद्धाद्यन्यतमत्वमसिद्धिसामान्यलक्षणम् ॥ प्रकृतपक्षग्रहाविरोधित्वमाश्रयासिद्धे लक्षणम् । प्रकृतपक्षसाधनग्रहाविरोधित्वे सति हेतुप्रकारकपक्षविशेष्यकज्ञानत्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवन्धकताशालियथार्थज्ञानविषयत्वम् । स्वरूपासिद्धे लक्षणम् । साध्यसम्वन्धितावच्छेदकत्वप्रकारकहेतुतावच्छेदकविशेष्यकग्रहत्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवन्धकताशालियथार्थ ज्ञानविषयत्वं व्याप्यत्वासिद्धे लक्षणम् मूलोक्ताश्रयासिद्धोक्तोदाहरणे चारविन्दे पक्षे गगनीयत्वं पक्षतावच्छेदकम् । नास्तीत्यरविन्दत्वं हेतुराश्रयासिद्धः । एतज्ज्ञानं परामर्शप्रतिवन्धकम् । अरविन्देगगनीयत्वं नास्तीतिज्ञाने सुरभित्वव्याप्यारविन्दत्ववद्गगनारविन्दमितिपरामर्शसंभवात् । एतस्यारविन्दे गगनीयत्वसम्वन्धावगाहित्वात् ॥ स्वरूपासिद्धस्य ज्ञानमपिपरामर्शप्रतिवन्धकम् । व्याप्यत्वासिद्धमपिपरामर्शप्रतिवन्धकम् । सोपाधिकः । अथकोयमुपाधिरितिचेदुच्यते ' साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । यथाधूमवान् अग्नेरित्यार्द्रेन्धनम् । भवति च तत्साध्यस्य धूमस्य व्यापकम् । यत्रयत्रधूमस्तत्र तत्रार्द्रेन्धनमितिसत्वात् । भवति च साधनस्य अग्नेरव्यापकं यत्राग्निस्तत्रार्द्रेन्धनमित्यसत्वात् । तप्तायः पिण्डेऽग्निसत्वेऽप्यार्द्रेन्धनाभावात् । उपाधिस्तुव्यभिचारज्ञानद्वाराव्याप्तिज्ञानप्रतिवन्धकः । अनुमानप्रकारश्चयथाअग्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धनसंयोगव्यभिचारित्वात् घटत्वादिवत् । योयत्साध्यव्यापकव्यभिचारी स सर्वोऽपि साध्यव्यभिचारी एवं प्रकृतानुमानहेतुभूते पक्षसाध्यव्याभिचारोत्थापकतया दूषकत्वमुपाधेः । प्रकृतपक्षसाध्यग्रहाविरोधित्वे सति पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदक

उपमितिकरणमुपमानम् । संज्ञासंज्ञिसम्वन्धज्ञानमुपमितिः । तत्करणंसादृश्यज्ञानम् । अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः । तथाहि । गवयशब्दवाच्यमजानन्कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं

सम्वन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवन्धकताशालियथार्थज्ञानविषयत्वंवाधस्य लक्षणम् । ग्रन्थोक्तोदाहरणे वह्नौ पक्षेऽनुष्णत्वाभावस्योष्णत्वस्य त्वगिन्द्रियेण निश्चयात द्रव्यत्वं हेतुर्वाधितः । एतद् ज्ञानं साक्षादनुमिति—प्रतिवन्धकम । वह्नावनुष्णत्वं नास्तीति ज्ञाने सति वह्निरनुष्ण इत्यनुमितेरसंभवात् तदभावलौकिकनिर्णयस्य तद्वत्ताज्ञाने प्रतिवन्धकत्वात् इति हेत्वाभासाः ४६ ॥

इति श्री वैद्यनाथ शास्त्रिकृतं भाषा टिप्पण्यादि युतमनुमानखण्डम् ॥ २ ॥

